National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(55): 197-202
© 2024 NJHSR
www.sanskritarticle.com

**डॉ.राजेन्द्र चिंतामणी जैन**
सहायक प्रोफेसर, साहित्य विभाग,
कविकुलगुरु कालिदास संस्कृत विश्व-
विद्यालय, रामटेक

**श्री.भारत पांडुरंग मिसाळ**
शोधछात्रः, साहित्य विभाग,
कविकुलगुरु कालिदास संस्कृत विश्व-
विद्यालय, रामटेक

**Correspondence:**
**डॉ.राजेन्द्र चिंतामणी जैन**
सहायक प्रोफेसर, साहित्य विभाग,
कविकुलगुरु कालिदास संस्कृत विश्व-
विद्यालय, रामटेक

# संस्कृतरूपकेषु प्रयुक्तभाषाणां स्वरूपविमर्शः

**डॉ.राजेन्द्र चिंतामणी जैन, श्री.भारत पांडुरंग मिसाळ**

भारतीयवाङ्मयं पुराकालादेव सर्वाभिः प्राचीनभारतीयभाषासमावेशितेन विशिष्यतेतराम्। प्राकृतं भारतीयभाषासु अन्यतमत्वेन आकरत्वेन शोभते। काव्यकर्मणि प्राकृतस्य मौलिकं स्थानं काव्यशास्त्रकारैः न्यरूपि। प्राकृतस्य भाषाणां भारतीयवाङ्मये स्थाननिर्धारणावसरे सर्वप्रथमंपूर्वाचार्यैः तासां वाङ्मयविषकानां कृतोल्लेखानां विषये विचारयामः। तत्रादौ संस्कृतकाव्यशास्त्रकारः महाकविः आचार्यः दण्डी काव्यादर्शे भारतीयवाङ्मयविषये स्वयं लिखति-

**तदेतद् वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।**
**अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम्॥**[१]

आचार्यदण्डिनो मतानुसारं भारतीयं वाङ्मयं चतुर्विधग्रन्थैः आसाद्यते तद्यथा- 'चतुर्विधाः हि ग्रन्थाः- संस्कृतनिबद्धा केचित्, प्राकृतनिबद्धाः केचित्, केचिदपभ्रंशनिबद्धाः, केचिदासां साङ्कर्येण निबद्धा मिश्रा इत्युच्यन्त इत्यर्थः।' अयमेव दण्डी पुनः अपभ्रंशपदस्य अर्थं लिखति यथा- **'शास्त्रेषु संस्कृतादन्य-दपभ्रंशतयोदितम्'।**[२] अस्य अपभ्रंश भाषा पदस्य वृद्धवाग्भटः पुनः अपभ्रंशस्तु यत्शुद्धं तत्तद् देशेषु भाषितम्' इत्येवम् अपभ्रंशवाङ्मयमपि तत्तद्देशे भाषितं वचोविन्यासरूपं शुद्धमेव भवतीति अपभ्रंशभाषायां लिखितग्रन्थानामपि साधुत्वमासादयति।

किंबहुना, प्राकृतभाषया ततोऽपि चारुतरं वाङ्मयं कश्चन कविराजः विनिर्मातुं प्रभवति यत्र काव्यसहजतायाः चरमोत्कर्षः साधितः भवति यथा- कविराजेन राजशेखरेण बालरामायणनाटके प्रस्तावनायाम् उपदर्शितः। -

**गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः।**
**सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम्॥**
**विभिन्नाः पन्थानः किमिति कथनीयाश्च त इमे।**
**निबद्धा यस्तेषां स इह कविराजो विजयते॥**[३]

किञ्च, काव्यं नैकासु उत सर्वासु भाषासु भाव्यम्; एतेनैव कश्चित्सुकवित्वमापद्यते इति कविप्रशस्तिः। कवेः काव्यं संस्कृतप्राकृतापभ्रंशादिभाषासु भवतु तत्रापि प्राकृतं काव्यं नूनं मधुरं भवति। यथोक्तं-

**एकोऽर्थः संस्कृतोक्त्या स सुकविरचनः प्राकृतेना परोऽस्मिन्,**
**अन्योऽपभ्रंशगीर्भिः किमपरमपरो भूतभाषाक्रमेण।**
**द्वित्राभिः कोऽपि वाग्भिर्भवति चतसृभिः किञ्च कश्चिद् विवेक्तुं,**
**यस्येत्थं धीः प्रपन्ना स्नपयति सुकवेस्तस्य कीर्तिर्जगन्ति॥**[४]

एतेन देशस्य संस्कृतिनिर्माणे भाषाणामपि महत्त्वपूर्णस्थानं भवति इत्यत्र नास्ति लेशोऽपि सन्देहः। संस्कृत-प्राकृत-पालि ततश्च अभिजातभारतीयभाषाः देशस्य वाङ्मयनिर्माणे ततश्च संस्कृतिनिर्माणे संधारणे च साधनभूताः सन्ति।

प्रागैतिहासिककालादेव वैदिकं संस्कृतं प्राकृतञ्चेति भारतदेशस्य आभूषणे स्तः। आधुनिकसाहित्यिकस्य डॉ.विनायक-त्र्यम्बककरंबेलकरमहोदयस्य मतानुसारं भारतीयरूपक-वाङ्मये संस्कृतं प्राकृतञ्चेति एकस्यैव वृक्षस्य शाखाद्वयं भवतः।[५] संस्कृतं प्रारम्भकालादेव शिष्टजनानां भाषा[६] रूपेण परिचिता।

स्कृतमिति पदस्य सामान्यार्थः भूषितम् अलङ्कृतमिति भाषाविद्भिः कृतः। रूपकसाहित्यस्य नाट्यसाहित्यस्य वा अध्ययनेन इदं स्पष्टं भवतियत्प्राकृतभाषिणः पात्राणि संस्कृतं ज्ञातुं, पठितुञ्च शक्नुवन्ति स्म। संस्कृतरूपकेषु मुद्राराक्षसादिषु क्षपणकसदृशानि प्राकृतभाषिनः पात्राणि संस्कृतमपि[7] वक्तुं ज्ञातुं च जाणन्ति शक्नुवन्ति चेति अस्माभिः ज्ञातुं शक्यन्ते। किंबहुना, मृच्छकटिकादौ नाट्यशास्त्रानुरूपं संस्कृतभाषिणश्च सूत्रधारादिपात्राणि (यथा मृच्छकटिकस्य सूत्रधारः[8]) प्राकृतमपि व्यवहर्तुं जाणन्ति इति भारतीयनाट्यसाहित्ये द्वयोः भाषयोः समसामयिकः समवर्तिश्चेति अविच्छेद्यः संबन्धः पुराकालात् स्थितः इत्यत्र नास्ति कस्यापि विप्रतिपत्तिः।

संस्कृतमित्यपि पदं सम् उपसर्गपूर्वकं डुकृञ्(करणे) (संस्करणे) धातोः कृदन्त मक्तफ प्रत्ययेन निष्पाद्यत इति ज्ञेयम्। तथाहि, संस्कृतमिति नाम तत्साधरणजनप्रदत्तं ज्ञायते यैः एकत्र महाजनपदादिषु इतोऽपि एका सामान्यजनजाति-कथ्यभाषा प्राकृतेति नाम्ना अवर्तत, किञ्चिच्छिष्टत्वेन वैदिकवाक्चेति लोके व्यवह्रियमाणा अवलोकिता, तदपेक्षया पाणिनिपातञ्जलव्या-करणादिभिः यत्संस्कृतं तस्य नाम संस्कृतमिति समागतम्। अत एव सम्भवतः आदिकविः वाल्मीकिरपि भाषामिमां संस्कृता वाक् इति नाम्ना उल्लिलेख। तत्कालादेव भाषेयं संस्कृतमिति नाम्ना परिचयं प्राप्ता।[9] अत्र विवेचनस्य तात्पर्यं कस्यापि भाषायाः श्रेष्ठत्वं पुरातनत्वञ्च ज्ञापने नास्ति अपितु भारतीयरूपककाव्यवाङ्मये, संस्कृतिनिर्माणे संवर्धने च द्वयोः भाषयोः मौलिकं साहचर्यमस्तीति ज्ञापनमेव तात्पर्यमवसेयम्। तथापि साहित्याध्ययनेन भाषामौलिकत्वविषयकं मतद्वयं स्पष्टतया वर्तते इति स्पष्टं भवति।

- **संस्कृतरूपकसाहित्ये संस्कृतं, तत्स्वरूपञ्च -**

पुराकालाद् अश्वघोष-भास-कालिदासप्रभृतयः नाट्यकाराः संस्कृतकविरूपेण एव साहित्यजगति विख्याताः सन्ति। अतः भारतीयनाट्यसाहित्यस्य भाषा प्रामुख्येन संस्कृतम् एव अस्ति। तत्रापि विशेषो नाम संस्कृतेन साकं तत्तत्कालिक्यः जनकथ्यभाषाः प्राकृतभाषाश्च संस्कृतकविभिः तेषां संस्कृतरूपकसाहित्ये समावेशिताः इति बहुभाषाणां भारतीयैक्यस्य च परिचयः तत्तत्कविभिः स्वीयरूपकसाहित्ये प्रदीयते इत्यत्र नास्ति संदेहः।

- **संस्कृतरूपकसाहित्ये प्राकृतम् अपभ्रंशभाषाप्रयोगाः,तत्स्वरूपञ्च -**

**१) रूपकसाहित्ये प्राकृतम्-**

प्राकृतभाषायाः प्रकृतिः स्वभावो वा मृदु कोमलतरो भवतीति काव्यशास्त्रकाराः प्रवदन्ति। महाकवेः राजशेखरस्य काले जनाः अपभ्रंशप्राकृतेन भाषन्ते स्म संस्कृतगद्यपद्यानां बोधदुष्करत्वं जायमानमासीत्। अतः राजशेखरमतानुसारं तस्य कर्पूरमञ्जर्यादि-सट्टकरचनाकाले संस्कृतापेक्षया जनानां कृते प्राकृतम् अतिसरल-सुबोधमासीत्।[10] नाट्यं लोकानुचरितं भवति अतः लोके आचरितानां विषयानामभिनयपुरस्सरं अभिनयनं आचरितविषय-सम्बद्धानां समाजजनानुकर्तृभिरेव साधनीयं भवति नाट्ये तथाकृतेन एव काव्यप्रयोजनभूतं साधारणीकरणपुरस्सरं अभेद्यं रसास्वादनं सम्पादितं भवति।

आद्यर्षिः भरतः नाट्यशास्त्रे रूपकाणि संस्कृतप्राकृतभाषा-द्वयोपेतानि रचयितुं निर्दिशति। विशेषत्वेन नाटके शौरसेनीमुपयोक्तुं निर्दिशति। तथाच अन्यासां तत्तत्प्रादेशिकानां प्राकृतभाषाणां प्रयोगं नाटके कर्तुं सूचयति। तद्यथा-

**शौरसेनी समाश्रित्य भाषा कार्या तु नाटके।**
**अथवा छन्दतः कार्या देशभाषाप्रयोक्तृभिः॥**
**नानादेशसमुत्थं हि काव्यं भवति नाटके॥**[11]

**वैय्याकरणानुगुणं प्राकृतपदनिर्वचनम्-**

मप्रकृतौ भवं ततः आगतं वेति प्रकृतफमित्येनां व्याकरणसम्बद्धां प्राकृतपदनिष्पत्तिं निरूपयन्तः समालोचकाः प्रकृति-पदस्य अर्थं 'संस्कृत'मिति कुर्वन्ति। आचार्यहेमचन्द्रस्य प्राकृतव्याकरणानुसारं मप्रकृतौ भवं ततः आगतं वेति प्राकृतफमिति पदनिष्पत्तौ 'प्रकृतिः संस्कृतम्, तत्र भवं ततः आगतं वा प्राकृतम्। संस्कृतानन्तरं प्राकृतमधिक्रियते। परन्तु आचार्यहेमचन्द्रस्य अनेकार्थसंग्रह इति कोशग्रन्थानुसारमेव प्रकृतिपदस्य संस्कृतमिति अर्थः न संगच्छते। स्वीये अनेकार्थसंग्रहकोशग्रन्थे आचार्येण हेमचन्द्रेण 'प्रकृतिर्यो-निशिल्पिनोः। पौरामात्यादिलिङ्गेषु गुणसाम्यस्वभावयोः॥ प्रत्ययात्पूर्वकायां च।'[12] इत्यनेन प्रकृतिशब्दस्य अर्थः पौरजनाः अमात्यादिरूपेण निरूपितः। अतः प्रकृतिपदस्य संस्कृतमिति अभिधेयोऽर्थ अपि न सम्भवति। लक्ष्यार्थोऽपि अबाधितत्वान्न सम्भवतीति व्याकरणप्रक्रियापेक्षया संस्कृतं प्राकृतस्य मूलमिति तेन अभिप्रैतम्।

**२) रूपकसाहित्ये महाराष्ट्री(सामान्य)प्राकृतम् -**

प्राकृतवैय्याकरणः हेमचंद्राचार्यः महाराष्ट्री इत्येवं कुत्रापि अनुलिख्य प्राकृतमिति सामान्यप्राकृतमित्युल्लेखनेनैव अस्य व्याकरणं, लक्षणम्, उदाहरणादीनि प्रतिपादयामास। अपरः प्राकृत-वैय्याकरणः वररुचिः स्वीये प्राकृतप्रकाश इत्याख्ये व्याकरणग्रन्थे अस्याः भाषायाः उल्लेखं महाराष्ट्री इत्यकरोत्।[13]

सामान्यतया या महाराष्ट्रे भाषमाणा प्राकृतभाषा अस्ति सा महाराष्ट्रीप्राकृतम् उच्यते। एतत्प्राकृतमेव सामान्यप्राकृतम् इत्येवं-रूपेण सार्वजनीनतया विख्यातं वर्तते। षष्ठशतके आचार्य दण्डी काव्यादर्शे महाराष्ट्रे भाषमाणामिमां भाषां उत्कृष्टभाषा रूपेण उल्लिखति यतोहि,

एतत्प्राकृतं सूक्तिरूपाणां रत्नानां खनिः वर्तते सेतुबन्धादिम-हाकाव्यानां रचना अनया कृतेति उल्लिखति। आचार्यहेमचन्द्रस्य उत्तरवर्ती लक्ष्मीधरः इति षड्भाषाचन्द्रिका व्याकरणग्रन्थस्य कर्ता एतत्प्राकृतं महाराष्ट्रोद्भवमित्येवं रूपेण उल्लिख्य आचार्यस्य दण्डिनः मतं समर्थयति।

संस्कृतनाटकेषु सर्वप्रथमतया कालिदासस्य अभिज्ञानशाकुन्तल-नाटके अस्य प्राकृतस्य प्रयोगाः दृश्यन्ते। ध्वनिपरिवर्तनकारणात् महाराष्ट्रीप्राकृतमिदम् अतीव समृद्धं प्राकृतमुक्तम्। प्रसिद्धभाषाविदः पिशलमहोदयस्य शब्दैः वदामश्चेद् 'महाराष्ट्रीप्राकृतं विना न अन्यत्प्राकृतं एतावत्काव्ये नाटकेषु च प्रयुक्तम्। न च अन्यस्मिन् कस्मिन्नपि प्राकृते एतावद् वर्णपरिवर्तनानि संभवन्ति। पद्यकाव्यावसरे महाराष्ट्रीप्राकृतस्य व्यञ्जनवर्णा महता आधिक्येन

लुप्ताः विधीयन्ते तेन च काव्यमितोऽपि गेयं, लालित्यमयं श्रुतिमधुरञ्च भवतीति महाराष्ट्रीप्राकृतम् नाट्यवाङ्मये पद्यरचनासु प्रामुख्येन प्रयुज्यते। पदेषु यश्रुतिः बाहुल्येन भवति। प्राचीनमहाराष्ट्रीप्राकृतमद्य जैनमहाराष्ट्रीप्राकृतम् इत्येवं रूपेण परिचिता वर्तते। एतत्प्राकृते अर्धमागधीवत् ककारस्थाने गकारः क्तप्रत्ययस्थाने च डकार प्रायः भवति। सामान्यप्राकृते एतन्न भवति।

श्रुतिमधुरमहाराष्ट्रीप्राकृतस्य काव्यानि एकस्मिन्काले एतावन्ति प्रभाववन्ति जातानि यस्मात्महाकविकालिदासप्रभृतिकवीनामपि महाकाव्यानि विशेषत्वेन आक्रान्तानि जातानि।

तद्यथा- कालिदासस्य अभिज्ञानशाकुन्तलतः कानिचन श्रुतिमधुरप्राकृतपद्यानि-

**ईषदीषच्चुंबिआइं भमरेहिं उह सुउमारकेसरसिहाइं।**
**ओदंसअंति दअमाणा पमदाओ सिरीसकुसुमाइं॥**[14]

**तुज्झ ण आणे हिअअं, मम उण मअणोदिवा वि रत्तिं वि।**
**णिक्किव! दावइ बलिअं, तुह हत्थमणोरहाइं अंगाइं॥**[15]

**उग्गिण्णदब्भकवला मई परिच्चत्तणत्तणा मोरी।**
**ओसरिअपांडुपत्ता मुअंति अस्सुं विअ लदाओ॥**[16]

**३) रूपकसाहित्ये शौरसेनीप्राकृतम् -**

शौरसेनीप्राकृतं संस्कृतनाट्यगद्यरचनासु संस्कृतस्य कृते सहचारिणी भाषा वर्तते। रूपकेषु स्त्रीपात्राणां, मध्यमाधम-संस्कृतेतरपात्राणाञ्च कृते गद्यरचनायां विशेषत्वेन अस्याः प्रयोगः भारतीयनाट्यकृद्भिः कृतः। संस्कृतस्य महाकवीनाम् अश्वघोष-भास-कालिदासादीनां रूपकवाङ्मये अस्याः प्राचूर्येण प्रयोगः कृतो दृश्यते। गिरनारशिलालेखेषु सम्राट् अशोकः चतुर्दशलिपीनां टङ्कणं कृतवान् तत्र अस्या प्रयोगः प्राथम्येन दृश्यते। जैनशास्त्रेषु अस्याः शास्त्रभाषारूपेण प्रयोगः ततोऽपि पुराकालाद् वर्तते। नाट्यशास्त्रानुसारं रूपकस्य प्रधाननायिकायाः सखीनाञ्च इयं संवादभाषा भवति। यथा शाकुन्तले प्रियंवदाअनुसूये शौरसेन्यां वदतः।

यथा मागधी मगधदेशस्य मूलभूता भाषा आसीत् तथैव शौरसेनीप्राकृतं शूरसेनस्य (व्रजमण्डलस्य मथुरासमीपवर्तिनः प्रदेशस्य) मौलिकभाषा आसीत्। अस्याः आरम्भः शूरसेनदेशतः मथुराप्रान्ततः एव मन्यते। अस्यां भाषायां पदरचनायां त›द, थ›ध/ह, क्त्वा›च्चा/त्ता इत्येवं विशेषवर्णपरिवर्तनं दृश्यते यन्महाराष्ट्रीप्राकृते न भवति।

नाट्ये विदूषकः हर्षव्यक्तीकरणावसरे- ही ही, ननु इत्यस्मिन्नर्थे- णं, हर्षावसरे- अम्महे, चेटीनिमन्त्रणावसरे- हञ्जे, विस्मय-निर्वेदाव-सरयोः- हीणामहे इत्यादिसंबोधनपदानि शौरसेनीप्राकृते उपयुनक्ति।

**तद्यथा-** बोधायनविरचिते भगवदज्जुके प्रहसने **शाण्डिल्यः-**

पुडमं एव्व अहं करडअसेससमिद्धे णिरक्खरप्पक्खित्तजिह्वे कंठप्पसत्त-जण्णोपवीदे बंमण्वमत्तपरितुठ्ठे कुले पसूदे, तदो दुदीअं अम्हाणं गेहे असणणासेण बुभुक्खिदो पादरसणलोहेण सक्किअ समणअं पव्वइदोह्मि, तदो तहिं दासीए उत्ताणं एककाल भत्तंतणेण बुभुक्खिदो तंवि विसज्जिअ चीवरं जिंदिअ पत्तं पतोलिअ छत्तमत्तं गहिअ णिग्गदोह्मि। ... (परिक्रम्य दृष्ट्) एसो खु भअवो (अपस्पृस्य) मरिसेदु भअवो।[17]

**४) रूपकसाहित्ये मागधीप्राकृतम् -**

मगधजनपदस्य भाषा मागधीप्राकृतं भवति। अश्वघोषस्य मतानुसारं भगवतः बुद्धस्य उपदेशभाषा मागधी आसीत्। पालिभाषा मागधीभाषामूलैव अस्तीति नात्र कस्यापि विमतम्। वैय्याकरणयोः वररुचि-मार्कण्डेययोः मागध्याः प्रकृतिभाषा शौरसेनीप्राकृतमिति। अस्य उदाहरणानि अशोकस्य शिलालेखसाहित्यमिति उच्यते। मार्कण्डेयस्य मतानुसारं भाषेयं राक्षस-भिक्षु-क्षपणक-चेटादिपत्रैः रूपकसाहित्ये प्रयुज्यते।[18] भरतमुनेः नाट्यशास्त्रानुसारम् अस्याः भाषायाः नाट्यप्रयोगाः निम्नवर्गीयपत्रैः भिक्षु-क्षपणकादिभिः क्रियते। विसर्गस्य स्थाने एकारः भवति। यथा - देवः =देवे।

मागधीभाषायाः शाकारी, चाण्डाली शाबरी चेति रूपत्रयं प्राप्तं भवति।

| | |
|---|---|
| १. स/ष/श> श, | २. र > ल, |
| ३.ज/र्य/द्य//य > य, | ४.न्य/ण्य/ज्ञ/ञ्ज > ञ्ञ, |
| ५. स्थ, र्थ > स्त, | ६. ट्ट/ ष्ट > स्ट, |
| ७.च्छ > श्च, | ८. क्ष > (उपध्मा)क, |
| ९.क्त > ड, | १०. क्त्वा > दाणि |

**अर्धमागधी**

अर्धमागधी प्राकृतं जैनशास्त्रग्रन्थानां आगमानाञ्च भाषा। मागध्याः ईषल्लक्षणानि यस्यां भवन्ति सा अर्धमागधी प्राकृतमित्युच्यते। संस्कृतनाट्येषु अपि अस्य प्रयोगाः प्राचूर्येण लभ्यन्ते। श्वेतांबरजैनपरंपरायाः सर्वेपि आगमग्रन्था अर्धमागध्यां लिखिताः सन्ति।

**५) रूपकसाहित्ये पैशाचीप्राकृतम् -**

प्राकृतभाषासु इयं प्राकृतभाषा प्राचीनतमा। प्राचीनपालि, अर्धमागधी शिलालेखीप्राकृतभाषाणां स्तरानुगुणः अस्य स्तरः भवति। पिशाचस्य इदं पैशाचं तस्य भाषा या सा पैशाची इति निर्वचनानुसारम् आचार्यवाग्भटस्य मतानुसारं भाषेयं भूतभाषा नाम्ना परिचिता जाता। जार्ज ग्रियर्सन मतानुसारं शक-यवनयोः मिश्रिता जातिः पैशाचि तस्या भाषा पैशाचीप्राकृतमिति प्रसिद्धम्। पैशाचि जातिरियं उत्तरपश्चिमपंजाब-हरियाणाप्रदेशे निवसति स्म। पैशाची भाषायाः नैकानि तत्त्वानि अद्यापि अफगानिस्तानादि-उत्तरपश्चिमदेशेषु लभन्ते।

परन्तु डॉ. हार्नली मतानुसारं पैशाची द्रविड-परिवारपय भाषा अस्ति। या द्रविडभाषाभिः प्रभाविता आर्यभाषाणां विकृतं रूपं भवति। गुणाढ्यस्य बृहत्कथा अस्यामेव भाषायां विरचिता यस्य इदानीं संस्कृतरूपान्तरं क्षेमेन्द्रस्य बृहत्कथामंजरी सोमदेवस्य कथासरित्सागरमिति ग्रन्थद्वयं वर्तते। चीनी तुर्कीस्तानप्रदेशस्य-

खरोष्ठीलिप्यां लिखितेषु शिलालेखेषु कुवलयमालायां च पैशाचीभाषायाः विशेषाः लभ्यन्ते। प्राकृतवैय्याकरणेन मार्कण्डेयेन देशभेदपुरस्सरं पैशीचिप्राकृतस्य १)कैकयपैशीचिप्राकृतम्, २)शौरसेनपैशीचिप्राकृतम् ३) पाञ्चालपैशीचिप्राकृतञ्चेति प्रकारत्रयं निर्दिष्टम्।

भाषायामस्याम् ण> न, ल> ख, ज्ञ/ न्य/ ण्य>ञ्ज, शषस>स त/द>त इत्यादीनि वर्णपरिवर्तनानि लक्ष्यन्ते।

**६) रूपकसाहित्ये चूलिकापैशाचीप्राकृतम्-**

चूलिकापैशाचीप्राकृतं पैशाचीप्राकृतस्य एका शाखा। आचार्यहेमचन्द्रः षड्भाषाचन्द्रिकाकारः पं.लक्ष्मीधरश्च चूलिकापैशाचीप्राकृतं स्वतन्त्र-भाषारूपेण अङ्गीचक्रतुः। महाकवेः हेमचन्द्रस्य कुमारपालचरित-महाकाव्ये, जयसिंहसूरेश्च हम्मीरमर्दन-नाटके षट्भाषास्तोत्रग्रन्थेषु च चूलिकाप्राकृतस्य लक्षणानि दृश्यन्ते। अस्यां वर्णवर्गस्य द्वितीय-चतुर्थवर्णौ प्रथम-तृतीययोः परिवर्तितौ भवतः। रकारस्य लकारः विकल्पेन भवति।

**७)रूपकसाहित्ये आवन्तिजप्राकृतम् -**

नाट्यशास्त्रकारस्य भरतमनेः मतानुसारमस्या भाषायाः प्रयोगं धर्तजनाः कुर्वन्ति। प्राकृतवैय्याकरणः मार्कण्डेयः अस्या अन्तर्भावं महाराष्ट्रीप्राकृते चकार।

**८) रूपकसाहित्ये प्राच्यप्राकृतम् -**

रूपकेषु प्राच्यप्राकृतस्य प्रयोगः विदूषकेन क्रियते। अस्यां भाषायां शौरसेनीप्राकृतस्य आवन्तीप्राकृतस्य लक्षणानि मिश्रितानि लभ्यन्ते। उदाहरणानि अस्मिन्नेवाध्याये अग्रे प्रदर्शितानि सन्ति।

**९) रूपकसाहित्ये वाह्लिकीप्राकृतम् -**

भरतमतानुसारं द्युतकराणां वाह्लिकीप्राकृतं भवति। मार्कण्डेयस्तु वाह्लिकीम् आवन्तीञ्च प्रथक्त्वेन अङ्गीकरोति। प्राकृतवैय्याकरणः मार्कण्डेयः अस्या अन्तर्भावं महाराष्ट्रीप्राकृते अकरोत्। वाह्लिकीभाषायां रकारस्थाने लकारो भवति। यथा- मारुदो इत्यस्य रकारस्थाने मालुदो। **१०) रूपकसाहित्ये दाक्षिणात्यप्राकृतम् -**

नाट्यशास्त्रानुसारं नाट्ये दाक्षिणात्यप्राकृतस्य प्रयोगं नगररक्षकाः योद्धारः द्युतकराश्च कुर्वन्ति। रामशर्मा तर्कवागीशस्य मतानुसारं भाषेयं रूपकसाहित्ये अमृतत्वमापादयति। वैदर्भी इत्यपि अस्याः कृते नामान्तरं प्रदीयते। यथा वर्तमानसंस्कृतरूपकेषु आवन्तीप्राच्ययोः प्रामाणिकानि उदाहरणानि लुप्तप्रायाणि जायमानानि सन्ति तथैव अद्य वाह्लिकीदाक्षिणात्ययोः अपि प्रामाणिकानि उदाहरणानि स्वतन्त्रास्तित्वाभावेन लुप्तानि जायमानानि सन्ति। मार्कण्डेय यथा अर्धमागध्याः तथैव अस्या अपि स्वतन्त्रभाषारूपेणास्तित्वं नाङ्गीकरोति।

**११) रूपकसाहित्ये अपभ्रंशम् -**

अपभ्रंशभाषानां प्रयोगेन काव्यनाट्यसाहित्यं प्रभूततया विरचितम्। नाट्यशास्त्रदृशा अपभ्रंशभाषाभिः काव्यानि नाट्यानि च रच्यन्ते स्म। काव्यादर्शकृतः आचार्यदण्डिनः मतानुसारं आभीर्यादयः कविभिः नाटककारैर्वा प्रयुक्ताः भाषाः काव्यनाटकेषु अपभ्रंशपदेन व्यवह्रियन्ते। यथोक्तमपि-

**शौरसेनी च गौडी च लाटी चान्या च तादृशी।**
**याति प्राकृतमित्येवं व्यवहारेषु सन्निधिम्॥**
**आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।**
**शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्॥**

किंबहुना, नाट्ये 'अपभ्रंशभाषणं सर्वथा श्रेष्ठ'मिति शङ्कुन्तलायां टीकाकारः शंकरो वदति। तद्यथा- संस्कृतात्प्राकृतं श्रेष्ठं ततोऽपभ्रंश-भाषणम्। महाकवेः राजशेखरस्य (ई.स.९००) काले अपभ्रंशभाषायाः सर्वत्र कथ्यभाषारूपेण प्रयोगः भवति स्म। अतः एव कर्पूरमञ्जरी सदृशम् उपरूपकं राजशेखरेण समग्रतया प्राकृतभाषायां रचितम्।

**प्रसिद्ध-संस्कृत-रूपकेषु प्राकृतभाषाप्रयोगस्य परिचयसंक्षेपः-**

| नाट्यकारः | संस्कृतरूपकग्रन्थस्य नामधेयम् | रूपकप्रकारः | संस्कृतभाषिपात्रसंख्या / प्राकृतभाषिपात्रसंख्या |
|---|---|---|---|
| **अश्वघोषः**[22] (प्रथमशताब्दिः) | शारिपुत्रप्रकरणम् (शारद्वतीपुत्रप्रकरणम्) | प्रकरणम् | दुष्टपात्र–**मागधी, अर्धमागधी** च। विदूषकः–**प्राच्यप्राकृतम्**, गणिकामागधवतीकुमारधनञ्जयौ–**महाराष्ट्रीप्राकृतम्** |
| **महाकविः भासः** (इ.स.पूर्वचतुर्थ शतकम् )[23] | दूतवाक्यम् | एकाङ्कनाट्यम् | प्राकृतं न प्रयुक्तम्। |
| | कर्णभारम् | एकाङ्कनाट्यम् | ०७/०१ शक्रः – **अर्धमागधी** |
| | दूतघटोत्कचम् | एकाङ्किनाट्यम् (उत्सृष्टिकाङ्कः) | १०/०३ गान्धारीदुःशलाप्रतीहारीस्त्रीपात्राणि–**शौरसेनीप्राकृतम्** |
| | ऊरुभङ्गम् | एकाङ्कनाट्यम् | १३/०३ गान्धारीपरिवीमालवी–स्त्रीपात्राणि– **शौरसेनीप्राकृतम्** |
| | मध्यमव्यायोगः | व्यायोगरूपकम् | ०९/०२ ब्राह्मणीहिडिम्बास्त्रीपात्राणि–**शौरसेनीप्राकृतम्** |
| | पञ्चरात्रम् | नाटकम् | २३/०३ वृद्धगोपालगोमित्रकगोपगोपिकाश्च–**आभीरी (मागधीप्राकृतम्)** |
| | अभिषेकनाटकम् | नाटकम् | ३१/०६ बिलमुखः, वानरी, सीतातारप्रतिहारी स्त्रीपात्राणि च–**शौरसेनीप्राकृतम्** |
| | बालचरितम् | नाटकम् | ३७/२६ नन्दगोपवृद्धगोपालदामकगोप–गोपिकाश्च – **आभीरी** (मागधीप्राकृतम्) चाण्डालकन्याप्रतीहारीधात्रीस्त्रीपात्राणि रक्षापुरुषश्च– **शौरसेनीप्राकृतम्** चाणूरमुष्टिकौ– **दाक्षिणात्य–प्राकृतम्** |
| | अविमारकम् | नाटकम् | २३/१४ नटीप्रतीहारी देवीचेटीधात्रीनलिनिकाकुरङ्गी–मागधिकाविलासिनीसौदामनीहरिणिका–वसुमित्रासुदर्शनास्त्रीपात्राणि–**शौरसेनीप्राकृतम्** विदूषकः– **प्राच्यप्राकृतम्** |
| | प्रतिमानाटकम् | नाटकम् | २५/१५ नटीप्रतीहारी अवदातिकासीताचेटीकौशल्या–सुमित्राकैकेयीविजयानन्दिनेकातापसस्त्री–पात्राणि सुधाकरनन्दिलकभटाश्च–**शौरसेनीप्राकृतम्** |
| | प्रतिज्ञायौगन्धरायणम् | नाटिका उपरूपकम् | उन्मत्तकः – **मागधी**, नटीविजयाप्रतीहारी–राणीस्त्रीपात्राणि सालकोनमुण्डकहंसक–श्रमणकाश्च– **शौरसेनीप्राकृतम्**, विदूषकः– **प्राच्यप्राकृतम्** |
| | स्वप्नवासवदत्तम् | नाटकम् | १८/१२ वासवदत्ताचेटीतापसीपद्मावती–धात्रीद्वयमधुकरिकापद्मिनिकाप्रतीहारीस्त्री–पात्राणि भटद्वयश्च–**शौरसेनीप्राकृतम्** विदूषकः– **प्राच्यप्राकृतम्** |
| | चारुदत्तम् | नाटकम् | १६/१३ शकारः– **शकारी (मागधी)**, नटीवसन्तसेनारदनिकाउन्मत्तिकामदनिका–चतुरिकाब्राह्मणीस्त्रीपात्राणि सूत्रधारसंवाहककर्णटककर्णपूरवर्धमानकाश्च– **शौरसेनीप्राकृतम्** विदूषकः–**प्राच्यप्राकृतम्** |

| | | | |
|---|---|---|---|
| **बोधायनः** (तृतीयशताब्दिः)[२४] | भगवदज्जुकम् | प्रहसनम् | ११/०७ गणिकावसन्तसेना–चेटीद्वय–माताखीपात्राणि शाण्डिल्यश्चैवं च – **सौरसेनीप्राकृतम्।** विदूषकः–**प्राच्यप्राकृतम्** |
| **महाकविः कालिदासः** (प्रथमशताब्दिः) | अभिज्ञानशाकुन्तलम् | नाटकम् | ३१/१६ दौवारिकश्यालौ= **सौरसेनीप्राकृतम्।** धीवरः द्वारक्षकौ च– **मागधीप्राकृतम्।** शकुन्तला, सखिद्वयं, नटी, तापसी, गौतमी इत्यादीनि द्वादशस्त्रीपात्राणि= **सौरसेनीप्राकृतम्।** विदूषकः– **प्राच्यप्राकृतम्।** केशायनविदुषां मतानुसारं शकुन्तलापुत्रः भरतोऽपि मागधीप्राकृतभाषी आसीत्। परं तथा कस्मिंश्चापि संस्करणे नावलोक्यते। |
| | विक्रमोर्वशीयम् | त्रोटकम् | २४/१४ उर्वशी–चित्रलेखा–रम्भा–मेनका–सहजन्या–महाराणीऔसीनरी–दासीनिपुणिका–धात्रीतापसी–परिचारिका यवनी–राजसेविकाचेटीति स्त्रीपात्राणि, किरात–भरतमुनिशिष्यपेलव–परिजनाश्च= **सौरसेनीप्राकृतम्।** (राजा) एक पद्य– **अपभ्रंशप्राकृतम्।** प्राकृतभाषिणाम् अन्यपद्यानि–महाराष्ट्रीप्राकृतम्। विदूषकः– **प्राच्यप्राकृतम्।** |
| | मालविकाग्निमित्रम् | (ऐतिहासिक)नाटकम् | २३/१३ मालविका–धारिणी–इरावती–दासीबकुलावलिका–मधुकरिका–दासीकौमुदिका–सेविकासमाहितिका–दासीनिपुणिका–प्रतीहारीजयसेना–मदनिकाज्योत्स्निकादासीद्वय इति स्त्रीपात्राणि, भृत्यकुब्जसारसश्च = **सौरसेनीप्राकृतम्।** विदूषकः(गौतमः)= **प्राच्यप्राकृतम्।** प्राकृतपद्यानि= **महाराष्ट्रीप्राकृतम्** |
| **शूद्रकः** (कालः)[२५] | मृच्छकटिकम् | प्रकरणम् | ३९/३७ नटी–रदनिका–मदनिका–वसन्तसेना–माता–चेटी–धूतेति स्त्रीपात्राणि सूत्रधारकर्णपूरकशोधनकश्रेष्ठिजनाश्च – **सौरसेनीप्राकृतम्** संवाहक–चारुदत्तचेट–स्थावरकाः रहसनश्च[२६] – **मागधीप्राकृतम्** वीरकचन्दनकौ– **आवन्तीप्राकृतम्** विदूषकः– **प्राच्यप्राकृतम्** शकारः– **शकारी** (मागधीविभाषा) चाण्डालद्वय– **चाण्डाली** प्राकृतम् माथुरद्युतकरौ – **ढक्की** प्राकृतम् |
| **विशाखदत्तः** (तृतीय–चतुर्थशताब्दिः) | मुद्राराक्षसम् | (ऐतिहासिक)नाटकम् | २९/२७ नटीप्रतीहारीचन्दनदास–समिद्धार्थकाद्यः द्वादशपात्राणि= **सौरसेनी प्राकृतम्।** पद्यभागस्तु= महाराष्ट्री–प्रभावितं सौरसेनीप्राकृतम्। वेशधारिपुरुष–क्षपणक–चाण्डाल–वज्रलोमा–बिल्ववक्राः पञ्चपात्राणि = **मागधीप्राकृतम्।** |
| **महेन्द्रविक्रमवर्मा** (सप्तमशताब्दिः) | मत्तविलासप्रहसनम् | प्रहसनम् | ०७/०४ नटी, देवसोमा, बौद्धभिक्षुश्च= **सौरसेनीप्राकृतम्।** उन्मत्तकः = **मागधीप्राकृतम्।** भास इव प्राचीनप्राकृतप्रयोगाः दृश्यन्ते। |
| **श्रीहर्षः** | रत्नावली | नाटिका उपरूपकम् | १७/११ नटी–मदनिका–परिचारिका चूतलतिका–महाराणीवासवदत्ता–सहचरीकाञ्चनमाला–सागरिका–सहचरीसुसंगता–द्वितीयपरिचारिकानिपुणिका–द्वारपालिकावसुन्धरेति स्त्रीपात्राणि, ऐन्द्रजालिकश्च= **सौरसेनीप्राकृतम्।** विदूषकः(वसन्तकः)= **प्राच्यप्राकृतम्।** |
| | प्रियदर्शिका | नाटिका उपरूपकम् | १५/०८ प्रतीहारी–चेटी–आरण्यका–मनोरमा–वासवदत्ता–दासीइन्दीवरिका–काञ्चनमाला चेति स्त्रीपात्राणि= **सौरसेनीप्राकृतम्।** विदूषकः= **प्राच्यप्राकृतम्** |
| | नागानन्दम् | नाटकम् | २३/१२ नटी–मलयवती–मनोहारिका–चतुरिका–नवमालिका–वृद्धा–देवीति स्त्रीपात्राणि, विटचेटौ च= **सौरसेनीप्राकृतम्।** किंकरः=**मागधीप्राकृतम्।** विदूषकः= **प्राच्यप्राकृतम्।** |
| **भट्टनारायणः** (सप्तम–अष्टमशताब्दिः) | वेणीसंहारम् | नाटकम् | ३३/१२ द्रौपदी–गान्धारी–विहङ्गिकेति स्त्रीपात्राणि, सुन्दरकश्च= **सौरसेनीप्राकृतम्।** द्रौपद्याः चेटी= **सौरसेनीप्राकृतम्।** (क्वचित् रकारस्थले लकारप्रयोगः।) वसागन्धा–रुधिरप्रियौ= **मागधीप्राकृतम्।** |
| **भवभूतिः** (सप्तम–अष्टमशताब्दिः) | मालतीमाधवम् | प्रकरणम् | १९/०९ माधवमित्रकलहंसः, कलहंसप्रियामन्दारिका–मालती–परिचारिकाअवलोकिता–सहचरीबुद्धरक्षिता–सखीलवंगिका–प्रतीहारी–प्रथमचेटी–द्वितीयाचेटीति स्त्रीपात्राणि च = **सौरसेनीप्राकृतम्।** |
| | महावीरचरितम् | नाटकम् | ५०/१९ सीता–उर्मिला–कैकेयी–मन्दोदरी–शूर्पणखा–त्रिजटा–लंका–चेटी–प्रतीहारी–सख्यः काश्चन स्त्रियश्च= **सौरसेनीप्राकृतम्।** |
| | उत्तररामचरितम् | नाटकम् | ३३/०६ कौशल्या–सीता–प्रतीहारी–विद्याधरीति स्त्रीपात्राणि, वाल्मीकिशिष्यसौधातकि–रामगुप्तचरदुर्मुखौ च = **सौरसेनीप्राकृतम्।** |
| **अनङ्गहर्ष** (मातुराजः) (ई.स.८००) | तापसवत्सराजचरितम् | नाटकम् | २५/१७ नटी–चेटी–वासवदत्ता–सखिकाञ्चनमाला–उपनायिकापद्मावती–सेविकाकोसलिका–उदयनप्रतीहारी–तापसीति स्त्रीपात्राणि, शिष्य–प्रथमशबर–द्वितीयशबर–माणवक–कुञ्जरक–विनीतकाश्चेति = **सौरसेनीप्राकृतम्।** |
| | | | अमात्यप्रणिधिलेखवाहकौ= **मागधीप्राकृतम्।** विदूषकः– **प्राच्यप्राकृतम्।** |
| **मुरारिः** (ई. ८००) | अनर्घराघवम् | नाटकम् | ३७/०५ सीता, दासीकलहंसिका, शूर्पणखा, विश्वामित्रशिष्यपशुमेढ्रः–बटुश्चेति = **सौरसेनीप्राकृतम्।** |
| **शक्तिभद्रः** (ई.९००) | आश्चर्यचूडामणिः | | नटीसीताशूर्पणखामण्डोदरीचेटीसौदामनी–स्त्रीपात्राणि– **सौरसेनीप्राकृतम्** |
| **कुलशेखरवर्मा** (ई.९००) | तपतीसंवरणम् | नाटकम् | २०/१० नटीदेवीचेटीरम्भामेनकानायिका चेटी(सौगन्धिका)चेटीजम्बूनदिकास्त्रीपात्राणि– **सौरसेनीप्राकृतम्** राक्षसः– **मागधी सौरसेनी च** विदूषकः– **प्राच्यप्राकृतम्** |
| | सुभद्राधनञ्जयम् | नाटकम् | २७/१३ कन्यकाचेटीकल्पलतिकाचेटी–(षट्पदिका)चेटी(लवंगिका)चेटी(नन्दनिका)सुभद्रादीर्घाध्वग–कात्यायनीद्रौपदी स्त्रीपात्राणि– **सौरसेनी प्राकृतम्** गोपालकद्वय– **मागधीप्राकृतम्** विदूषक– **प्राच्यप्राकृतम्** |
| **राजशेखरः** (नवम–दशम शताब्दिः) | बालरामायणम् | | ७७/२७ सीता– सखीद्वयप्रतीहारी–मदा पक्षी सुवेगा–सखीहेमप्रभा–चामरधारिणी सौदामिनी–सिन्दूरिका–धात्री–रावणप्रतीहारी–रावणअनुचरी–प्रभंजनिका–शूर्पनखा–कैकेयी–कौशल्या–सुमित्रा–यमुना–राक्षसीत्रिजटा –चरणी–लंकेति स्त्रीपात्राणि, ऋषीकपुलस्त्यशिष्य–बटुभवभूति–उपाध्याय–कपित्थ–दुर्मुखराक्षस–राक्षसकंकालक –चन्दनखण्ड–पारिपार्श्वे काश्च–**सौरसेनीप्राकृतम्** |
| | विद्धशालभञ्जिका | (ऐतिहासिकी) नाटिका उपरूपकम् | १८/१२ सेविकाकुरंगिका–सेविकातरंगिका–चेटी–देवी–परिचारिका मेखला–सेविकासुलक्षणा–सेविका विचक्षणा–नायिकामृगाङ्कावली– |

| | | | |
|---|---|---|---|
| | कर्पूरमञ्जरी | सट्टक-<br>उपरूपकम् | २३/१३ विदूषकः- **प्राच्यप्राकृतम्**<br>(सर्वेषां पात्राणां) गद्यभागस्य कृते-<br>**शौरसेनीप्राकृतम्**<br>(सर्वेषां पात्राणां) पद्यभागस्य कृते-<br>शौरसेनीमिश्रित **महाराष्ट्रीप्राकृतम्** |
| **शीलांकाचार्यः**<br>(इ.स.८६८) | विबुधानन्दम् | एकांकिनाट्यम् | २१/०७<br>नटीचेटीचतुरिकानायिकाबन्धुमति-<br>महा राणीचित्रलेखा-<br>सखीचन्द्रलेखा-<br>अन्यचेटीतिस्त्रीपात्राणि- **आवन्ती**<br>(अथवा महाराष्ट्रीप्रभावितशौरसेनी)<br>विदूषकः- **प्राच्यप्राकृतम्** |
| **क्षेमीश्वरः**<br>(दशमशताब्दिः) | चण्डकौशिकम् | नाटकम् | २४/१३ शैव्याचास्मतीप्रतिहारीति-<br>स्त्रीपात्राणां वनेचर-बालक-बटु-<br>वेतालपुरुषपात्राणां च-<br>**शौरसेनीप्राकृतम्**<br>विदूषकः- **प्राच्यप्राकृतम्,**<br>पापपुरुषः- **औत्कली**<br>**(मागधीविभाषा)प्राकृतम्,**<br>चाण्डालवेशधारिधर्मः<br>चाण्डालानुचरौ- **मागधीप्राकृतम्** |
| **कृष्णमिश्रः**<br>(ई.स.१०४९) | प्रबोधचन्द्रोदयम् | (प्रतीकात्मक)<br>नाटकम् | ४४/१५<br>नटीरतिमतितृष्णाहिंसाविभ्रमावती-<br>मिथ्यादृष्टिकरुणामैत्रीप्रतिहारीस्त्रीपात्रा<br>णि- **शौरसेनीप्राकृतम्,**<br>चार्वाकशिष्य-राजसीश्रद्धा च-<br>**बाह्लिकी प्राकृतम्,**<br>पुरुष-दिगम्बर-क्षपणकाः-<br>**औत्कली(मागधीविभाषा)प्राकृतम्** |
| **बिल्हणः**<br>(ई.स.१०३०-<br>११००) | कर्णसुन्दरी | नाटिका<br>उपरूपकम् | १६/०९ नटीदेवीहारलतातरङ्गवती-<br>नायिकानायिकासखी-<br>चेटीबकुलावली-<br>चेटीमन्दोदरी-प्रतीहारीति<br>स्त्रीपात्राणि- **शौरसेनीप्राकृतम्**<br>विदूषकः- **प्राच्यप्राकृतम्।**<br>नेपथ्याद्गाथापाठः-<br>**महाराष्ट्रीप्राकृतम्** |

**संदर्भ सूची :**


[१] काव्या.१

[२] काव्या.१.३५

[३] बाल.१०

[४] का.मी.१.९.पृ.४८-४९

[५] भरताच्या नाट्यशास्त्रात संस्कृत व प्राकृत या दोन्ही एकाच वृक्षाच्या शाखा आहेत. (संस्कृतसाहित्याचा सोपपत्तिक इतिहास पृ.१५८)

[६] संस्कृतसाहित्याचा सोपपत्तिक इतिहास, पृ.१७५

[७] क्षपणकः - (स्वगतम्। संस्कृतेन) अये! श्रुतं मलयकेतुहतकेन!! कृतार्थोऽस्मि। (मुद्रा.५.६ पृ.२४४)

[८] कार्यवशात्प्रयोगवशाच्च प्राकृत भाषी संवृत्तः। (मृच्छ.१)

[९] युनिट-२ संस्कृतभाषा की प्रकृति, २.५ संस्कृतभाषा की सम्पन्नता, ज्ञानकोश (इ-रिसोर्स)

[१०] क.मं. प्रस्तावना पृ.६

[११] ना.शा.१७.४६

[१२] अ.सं.०३.२९४ पृ.७२

[१३] डॉ.महेश्वर प्रसाद सिंहविरचितं संस्कृतरूपक और प्राकृत, भूमिका पृ.१०

[१४] अभि.शा.१.४

[१५] अभि.शा.३.१९

[१६] अभि.शा.४.१४

[१७] भगव.पृ.९

[१८] प्रा.स.पृ.१०१

[१९] काव्या.१.३५

[२०] प्राकृतप्रकाशः (श्रीमथुराप्रसाददीक्षित) प्रस्तावना पृ.२

[२१] क.मं. प्रस्तावना पृ.क्र.६

[२२] अश्वघोष तथा भास द्वारा प्रयुक्त प्राकृत भाषाओं की दृष्टि से विचार करने पर यह ज्ञात होता है कि अश्वघोष की प्राकृत भास की प्राकृत की अपेक्षा प्राचीन है। प्राकृत भाषा के मर्मज्ञ विद्वान् डॉ.नेमिचन्द्र शास्त्री के अनुसार भी अश्वघोष के बाद ही भास की प्राकृत को स्थान प्राप्त होता है।' (प्राकृतभाषाओं की नाट्य-साहित्य में प्रयुक्तियाँ, पृ.१२१)

[२३] प्राकृतभाषाओं की नाट्यसाहित्य में प्रयुक्तियाँ, पृ.१२०

[२४] इस नाट्य के कर्ता बोधायनधर्मसूत्र के लेखक बोधायन ही है जिनका समय तीसरी शताब्दी ई. है। डॉ.राधावल्लभत्रिपाठी जी का भी यही मत है।

[२५] कविशूद्रक के समय की पूर्व सीमा ई.स.पू.३०० तथा अपरसीमा ई.स.३०० से ७०० तक है। (प्राकृतभाषाओं की नाट्यसाहित्य में प्रयुक्तियाँ, पृ.१३९)

[२६] मृच्छकटिकस्य विवृत्तिकारस्य पृथ्वीधरस्य मतानुसारं चारुदत्तस्य पुत्रः रोहसेनः अपि मागध्यां संवदति। (प्राकृतभाषाओं की नाट्य-साहित्य में प्रयुक्तियाँ, पृ.१४१)